# WEST BENGAL STATE UNIVERSITY
B.A. Honours 2nd Semester Examination, 2020

## SANACOR03T-SANSKRIT (CC3)

Time Allotted: 2 Hours Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं कस्यचिद् एकस्य प्रश्नस्योत्तरं प्रदेयम्। 10×1 = 10

(क) तारापीडस्य मन्त्री कः आसीत् ? मन्त्रे उपदेशः संक्षेपेण विव्रियताम्। 2+8

(ख) 'वाणोच्छिष्टं जगत् सर्वम्'– अस्योक्तेः यथार्थता निरूप्यताम्। 10

2. अधोलिखितेषु यथेच्छं त्रयं संस्कृतभाषया देवनागरलिप्या च व्याख्येयम्। 5×3 = 15

(क) निसर्गत एव अभानुभेद्यम् रत्नालोकच्छेद्यमप्रदीप-प्रभापनेयमतिगहनं तमो यौवनप्रभवम्।

(ख) यौवनारम्भे च प्रायः शास्त्रजल-प्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः।

(ग) मनसा देवताध्यारोपणप्रतारणादसम्भूत-सम्भावनोपहताश्च अन्तःप्रविष्टापरपरभूजद्व-यमिवात्मबाहुयुगलं सम्भावयन्ति।

(घ) त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते।

(ङ) अभिषेकानन्तरं च प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।

अथवा

अधोलिखितेषु विषयेषु यथेच्छं त्रयमाश्रित्य संस्कृतभाषया देवनागरलिप्या च टीकां लिखतु। 5×3 = 15

(i) तिमिरान्धत्वम्, (ii) गुरूपदेशः, (iii) वृद्धत्वम्, (iv) महापातकः, (v) अभिचारक्रिया, (vi) सप्तद्वीपा।

### SECTION-B

3. अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योत्तरं प्रदेयम्। 10×1 = 10

(क) कः आसीत् विहारभद्रः ? अनन्तवर्माणं प्रति विहारभद्रस्य कटुपदेशाः आलोचनीयाः। 2+8

(ख) 'तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता' इति पाठ्यविषयमवलम्ब्य विचार्यताम्। 10

4. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। $2\times5 = 10$

(क) विश्रुतचरितम् इति ग्रन्थः केन रचितः ? ग्रन्थस्य मूलग्रन्थः कः ?

(ख) कुत्र विश्रुतेन अष्टवर्षदेशीयबालकः दृष्टः ?

(ग) कतिसंख्याकैः कैश्च फलैः बालकस्य प्राणरक्षा अभवत् ?

(घ) बुद्धिहीनः राजा केन अभिभूतो भूत्वा आत्मानं न जानाति ?

(ङ) कर्म कतिविधम् ? के च तद्भेदाः ?

(च) बुधाः कं पण्डितं वदन्ति ?

(छ) 'हस्तं प्रसारयन्नेवोत्तिष्ठति'— कः किमर्थं हस्तं प्रसारयति ?

(ज) योगक्षेमौ कौ ?

## SECTION-C

5. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतभाषया देवनागरलिप्या च टीकां लिखतु। $5\times1 = 5$

(i) हर्षचरितम्, (ii) हितोपदेशः, (iii) पुरुषपरीक्षा, (iv) अम्बिकादत्तव्यासः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——